श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

शेङ्गलिपुरम् श्री अनन्तरामदीक्षित विरचितं

# ॥ श्री गुरुवातपुरीश पञ्चरत्नम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गुरुवातपुरीश पञ्चरत्नम् ॥

कल्याणरूपाय कलौ जनानां
कल्याणदात्रे करुणासुधाब्दे।
कंब्वादि दिव्यायुध सत्कराय
वातालयाधीश नमो नमस्ते ॥ 1 ॥

नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण।
नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण ॥

नारायणेत्यादि जपद्भिरुच्चैः
भक्तैस्सदा पूर्णमहालयाय।
स्वतीर्थ गाङ्गोपम वारिमग्न
निवर्तिता शेषरुजे नमस्ते ॥ 2 ॥

नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण।
नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण ॥

ब्राह्मे मुहूर्ते परितस्स्वभक्तैः
सन्दृष्ट सर्वोत्तम विश्वरूप।
स्वतैलसंसेवक रोगहर्त्रे
वातालयाधीश नमो नमस्ते ॥ 3 ॥

नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण।
नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण॥

बालान् स्वकीयान् तव सन्निधाने
दिव्यान्नदानात्परिपालयद्भिः।
सदा पठद्भिश्च पुराण रत्नं
संसेवितायास्तु नमो हरे ते॥ 4॥

नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण।
नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण॥

नित्यान्नदात्रे च महीसुरेभ्यः
नित्यं दिविस्थैर्निशि पूजिताय।
मात्रा च पित्रा च तथोद्धवेन
संपूजितायास्तु नमो नमस्ते॥ 5॥

नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण।
नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण॥

अनन्तरामाख्य महिप्रणीतं
स्तोत्रं पठेद्यस्तु नरस्त्रिकालम्।
वातालयेशस्य कृपाबलेन
लभेत सर्वाणि च मङ्गलानि॥ 6॥

नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण।
नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण॥

गुरुवातपुरीश पञ्चकाख्यं
स्तुतिरत्नं पठतां सुमङ्गलं स्यात्।
हृदि चापि विशेत् हरिः स्वयं तु
रतिनाथायुत तुल्यदेह कान्तिः॥ 7॥

नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण।
नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण॥

॥ श्री गुरुवातपुरीश पञ्चरत्नं समाप्तम्॥